
# ||ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ ||



Tracking

| Sr | Date | Nature | Remarks |
|---|---|---|---|
| 1 | 15/12/2011 | Completion | First round typing |
| 2 | 18/12/2011 | Proof Correction | MS Venugopal |
| 3 | 25/12/2011 | Correction started | By self |
| 4 | 15/01/2012 | Correction Completed | First Round Correction Completed. |
| 5 | 29/101/2012 | 2ND Correction | 2 nd round correction completed. |

# ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಟ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of Sri Acharya Madhwa. It is a humble effort to make available this Great work to Sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 9901971176, 8095551774, Email : srkarc@gmail.com*

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಜ್ಞಾನ ಯಜ್ಞ"

"ಮಾತೃದೇವೋ ಭವ – ಪಿತೃದೇವೋ ಭವ-ಆಚಾರ್ಯದೇವೋ ಭವ"

।।ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ।। ........ 1

॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಟ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ ॥ ........ 2

॥ तीर्थप्रभन्ध ॥ ........ 8

॥ पश्चिम प्रबन्ध ॥ ........ 8

मंगळाचरणॆ ........ 8

2. उपोद्घात ........ 8

3. परशुरामक्षेत्र ........ 8

4. रजतपीठपुरं (उडुपि) ........ 9

5. पाजकक्षेत्र (विमान गिरि) ........ 10

6. विश्वनाथक्षेत्र (ऎळ्ळूरु) ........ 11

7.नन्दिकेश्वर वर्णन् ........ 12

8. मध्यवाट मठ (नडुंताडि) ........ 12

9. चिन्तामणि नरसिंह ........ 13

10. नेत्रावती नदिय वर्णनॆ ........ 13

11. नेत्रावती मत्तु कुमारधारा नदिगळ संगम वर्णन्. ........ 14

12. कुमारधारा नदीवर्णन् ........ 14

13. सुब्रह्मण्यक्षेत्र मत्तु सुब्रह्मण्यदेवर वर्णन् ........ 14

14. वेदव्यास संपुट ........ 15

15 .पयस्विनी नदि ........ 16

16. सुवर्णानदि ........ 16

17. कुम्भासि क्षेत्र ........ 16

18. कोटेश्वरक्षेत्र ........ 16

19. कोडशङ्करनारायण क्षेत्र ........ 17

20. कॊल्लूरु क्षेत्र ........ 17

21. सह्याद्रि ........ 18

22. हरिहर ........ 18

23. (बिदरहळ्ळि) अश्वत्थनारायण....19

24. बिदरहळ्ळि सोमेश्वर....19

25. बंकापुर केशव ....20

26. वरदानदि....20

27. बनवासि मधुकेश्वर ....20

28. धर्मगङ्गा नदी ....20

29. शाल्मलीनदी ....21

30. सोदाक्षेत्र....21

31. मंजुगुणि वेंकटेश....21

32. एणभैरव ....22

33. गोकर्ण ....22

34. कोल्हापुर ....23

35. तपती (नदिय परिचय)....23

36. नर्मदा ....23

37. प्रभासक्षेत्र....23

38. बाणगङ्गा....24

39. द्वारका क्षेत्र....24

40. गोमती नदि....24

41. चक्रतीर्थ ....24

42 शङ्खोद्धारतीर्थ....25

43. गोपी चंदन महिमा ....25

44. सिद्धपुरी मत्तु बिन्दुसरोवर....25

45. पुष्करक्षेत्र....25

उत्तर प्रबन्ध ....26

श्री कृष्णानदी....26

2.पंढरापुर....26

2. गोदावरीनदि....27

4. यमुना नदि ........ 28
5. त्रिवेणी प्रयाग क्षेत्र ........ 28
7. गंगा ........ 28
8. काशीक्षेत्र ........ 30
9.बिंदुमाधव ........ 31
10. श्री विश्वनाथ ........ 31
9. गयागदाधर ........ 31
10. फल्गुनदी ........ 32
11. मथुरा ........ 32
12. विश्रांति तीर्थ ........ 32
13. वृंदावन ........ 33
14. अयोध्या ........ 33
15. नैमिषारण्य ........ 33
16. हस्तिनापुरी ........ 33
17. कुरुक्षेत्र ........ 34
18. शंबल ........ 34
19. षट् प्रयागः ........ 34
20. बदरीक्षेत्र ........ 34
पूर्व प्रबन्धः ........ 36
1.गङ्गासागरसङ्गम ........ 36
2.पुरीजगन्नाथ ........ 36
3. श्रीशैल ........ 36
4. अहोबल ........ 37
5. भवनाशिनी नदि ........ 38
6. निवृत्तिसङ्गम वर्णन् ........ 38
7. तुङ्गभद्रा नदि ........ 38
8.हंपेय विठ्ठल ........ 38

9. विरूपाक्ष ........ 39

10. हंपे ........ 39

11. हंपादेवि ........ 39

12. आनॆगॊंदि ........ 39

13. श्री जयतीर्थरु ........ 40

14. तिरुपति (वेङ्कटाचलक्षेत्र) ........ 40

15.सुवर्णमुखी नदी ........ 41

16. कांचीवरदराज ........ 42

17. शिवकांची –एकाम्रेश्वर ........ 42

18. कंचि कामाक्षी ........ 42

19. अरुणाचलेश्वर (तिरुवण्णामलै) ........ 43

20. तिरुक्कोयिलूरु ........ 43

21. वृद्धाचलेश्वर ........ 43

22. श्रीमुष्ण भूवराह ........ 43

23. कुंभघोण ........ 44

दक्षिणप्रबन्ध ........ 44

श्रीरंगक्षेत्र-श्रीरंगनाथ ........ 44

2. पंचफणशेष ........ 45

3. चंद्रपुष्करिणि ........ 45

4. कावेरी नदी ........ 46

5. वृषभाचल ........ 46

6. नूपुरगङ्गा ........ 46

7. दर्भशयन ........ 46

8. रामसेतु ........ 47

9. रामेश्वर ........ 48

10 धनुष्कोटि ........ 49

11. श्रीरामपादस्तोत्र ........ 49

12. श्रीराम स्तोत्र ........ 49
13. ताम्रपर्णी नदि ........ 50
14. महेंद्र पर्वत ........ 50
15. कन्याकुमारि ........ 50
16. अगस्त्यवर्णनं ........ 51
17. शुचींद्रक्षेत्र ........ 51
18. आदिकेशवक्षेत्र ........ 51
19. घृतमालानदी ........ 51
21. अनंतशयनक्षेत्र ........ 52
21. उपसंहार ........ 53
22. फलश्रुति ........ 53
दक्षिण प्रबन्धं संपूर्ण ........ 53
इति श्रीमत्कविकुलतिलक वादिराजपूज्यचरणविरचित तीर्थ प्रबन्धं संपूर्ण श्री कृष्णार्पणमस्तु ........ 53
॥ ध्यान स्नानम् ॥ ........ 54

# ॥ तीर्थप्रभन्ध ॥

## ॥ पश्चिम प्रबन्ध ॥

### मंगळाचरणॆ

हरिक्षीराम्बुदेः स्वैरं भवघर्मरिपोर्मनः ।
विहराहरहश्चित्रचारित्रचतुरोर्मिषु ॥ 01 ॥

### 2. उपोद्घात

हयग्रीवदयासिन्धुरन्धूकृतभवाम्बुधिः ।
प्रबन्धमप्रतिद्वन्द्वं करोत्वेनमनेनसं ॥ 02 ॥

आजन्मभूमेरटतोऽखिलेषु तीर्थेषु तद्वर्णनभारमूढ्वा ।
आयासमस्मन्मृदुमानसस्य वायुर्मुहुः कृन्ततु मध्वरूपी ॥ 03 ॥

वागीशतीर्थमुनिवर्य भवद्दयाम्बुयोगेन पावय मनोर्गृहमन्वहं मे ।
नागेन्द्रतल्पमधिरूपय तत्पदाब्ज रागेण रञ्जय कलिं जय तद्विविक्षुं ॥ 04॥

तीर्थक्षेत्रतदीशानां माहात्म्यानि यथामति ।
वादिराजो यतिः स्तौति पद्यैःकतिपयैः कविः ॥ 05 ॥

### 3. परशुरामक्षेत्र

कर्णोपदन्यस्तरुचीरिरंसुः वाराशिवस्त्रं जघनाद्धि यस्याः ।
अमूमुचद्बाणकरेण भूमेः श्री भार्गवस्सा जयति क्षितिर्नः ॥ 06 ॥

## 4. रजतपीठपुरं (उडुपि)

काशीतले कृतपदापि सरित्सुराणामायाति युद्गतपवित्रसरोऽधुनापि ।
रुद्रादिदेवगणसेवितसर्वभागं तद्रूप्यपीठपुरमप्रतिमं त्रिलोक्यां ॥ 07

यस्मिन्वाग्वज्रधाराः दुरितकुलमहातूलदाहेऽतिशूराः
दण्डप्रोद्भासिहस्ताः  स्फुरदसिसमसन्मार्गसक्ताः समस्ताः ।
श्रीकृष्णस्नेहपाशाः श्रमहरगतयः शान्तिभाजो विरक्ताः
योगीन्द्राश्चित्रलोकाधिपनिपविभवाः मध्वदासा जयन्ति ॥ 08 ॥

द्वारावतीं सकलभाग्यवतीमुपेक्ष्य
गोपालबाललननाकरपूजनं च ॥
वार्धिं वधूगृहमतीत्य स मध्वनाथो
यत्रास्ति तद्रजतपीठपुरं गरीयः ॥09॥

रूप्यात्मकस्य भवतस्तुलनां न भेजुः
क्षेत्राणि भारतमहीरचितान्यमूनि ।
ईशाचलं च जयसीश्वरमात्रवासं
श्रीमध्वहस्तकमलार्चित कृष्णमूर्त्या ॥ 10 ॥

निर्मथ्योग्रभवार्णवे निजमनोऽभीष्टं दिशामीति यः
सम्यग् ज्ञापयितुं करेण विलसन्मन्थानमन्येन च ।
रम्यं धाम दधन्महेशरजतग्रामश्रियोऽलङ्कृतिः
कर्मन्दीश्वरभक्तिबन्धनवशःप्रीतोऽस्तु कृष्णः प्रभुः ॥ 11 ॥

चाञ्चल्यं पृष्ठदेशे कठिनकृतिरधोवक्रता क्वापि कोपो
याञ्चा कस्मादकस्मादपकृतिरुपकारिष्वपि प्राङ्गमौळे ।
स्त्र्यर्थेऽन्यस्त्रीष्ववज्ञा किमिति रमण ते चोरता मायिकत्वं
चित्रं रोहावरोहावितिविरसगिराप्यादृतः पातु कृष्णः ॥ 12 ॥

रौप्यात्मकामरपुरस्सर सन्निरूप्य
रूप्यात्मकं च भवतः कृपया गतस्य ।
रूप्यात्मकालयकृतालय यत्त्वमेव
रूप्यात्मनो गतिरिहापि तदीश पाहि ॥ 13 ॥

शिवान्तर्यामितां स्वीयां प्रियान् प्रति निबोधयन् ।
दयावारिनिधिश्यैवीं शिलामाश्रित्य शोभते ॥ 14 ॥

ईशस्याहीशपदवीं भासयन्निव भाविनीम् ।
अध्यास्ते शेषशयनः स्निग्धां लिङ्गशिलां हरिः ॥ 15 ॥

## 5. पाजकक्षेत्र (विमान गिरि)

पवित्रं पाजकक्षेत्रं को न सेवेत कोविदः ।
सत्यलोकेश्वर प्राणो यत्रावातरदुत्सुकः ॥ 16 ॥

परश्वधधनुर्बाणगदातीर्थोपशोभिते ।
गिरौ यत्र सुतप्रेम्णावास्ते नित्यं हरिस्वसा ॥ 17 ॥

त्रिशूलधारिणी दैत्यगजकुम्भविधारिणी ।
गिरीन्द्रशिखरावास दुर्गा स्वर्गापवर्गदा ॥ 18 ॥

प्रळये जलदुर्गासि सर्गादौ गिरिविस्तृतिः ।
इदानीं स्थळदुर्गासि दुर्गा त्वं सद्गुणार्णवे ॥ 19 ॥

दुर्ज्ञेयत्वात् दुःखदत्वात् दुष्प्रापत्वाच्च दुर्जनैः ।
सतामभयभूमित्वात् दुर्गा त्वं हृद्गुहाश्रयात् ॥ 20 ॥

## 6. विश्वनाथक्षेत्र (ऐळूरु)

रक्षोगणक्षपणदक्षमहात्रिशूलं त्र्यक्षं वलक्षतनुमुल्लसदक्षमालं ।
रक्षाघशिक्षणविचक्षणशक्तियूथं दक्षाध्वरक्षयदमाश्रय विश्वनाथं ॥ 21 ॥

अङ्गानुषङ्गतभुजङ्गमतुङ्गभोगं
गङ्गातरङ्गकृतमङ्गळमौळिभागं ।
सङ्गीतलोलयतिपुङ्गवगीतगाथं
तं गौर्यपाङ्गरसमाश्रय विश्वनाथम् ॥22॥

इन्द्रादिदेवगणवन्दितपादपद्मं
चन्द्रार्धचूडमरविन्ददळायताक्षं ।
कन्दर्पवैरिणमनिन्द्यममन्धबोधं
तं देवदेवमिममाश्रयविश्वनाथं ॥ 23 ॥

वन्दारुनारदसनन्दनमुख्ययोगी-
वृन्दैः प्रवन्द्यचरितैः परितश्च सेव्यं ।
इन्दिन्दिरोपमसितेतरकण्ठकान्तिं
सौन्दर्यमूर्तिमिममाश्रय विश्वनाथं ॥ 24 ॥

छन्दश्चयस्तुतचरित्र पुरत्रयारे
कुन्दप्रसूनुकृतसेवनतृप्तचित्त ।
त्वां दीनबन्धुमरुणेन्दुलसत्कपर्दम ।
वन्देऽरिमर्दन सुहृद्धन विश्वनाथ ॥ 25 ॥

## 7.नन्दिकेश्वर वर्णन्

सुचारु कर्णलाङ्गूलश्रृङ्गाङ्घ्रुदरदृङ्मुखं
ककुद्मन्तं वृषं श्वेतं नौमि शङ्करवाहनं ॥ 26 ॥

## 8. मध्यवाट मठ (नड्डुंताडि)

भवघर्मभवार्तिघ्नः स सता सेव्यतां मठः ।

कृष्णद्वैपायनघनो यत्रागाद्वायुवर्त्मना ॥ 27 ॥

स्नेहार्द्रमध्वहृदयाख्य दशानुषक्तं
मोहाख्यसन्तमसकृन्तनतीव्रशक्तिं ।
श्रीमध्यवाटमठपौरुटभाजनस्थं
व्यासप्रदीपमिममादरतो भजध्वं ॥ 28 ॥

वेदव्यास गुणावास विद्याधीश सतां वश ।
मा निराशं गतक्लेशं कुर्वनाशं हरेऽनिशं ॥ 29 ॥

## 9. चिन्तामणि नरसिंह

भून्यस्तवामाङ्कगवामपाणिमुत्क्षिप्तदक्षोरुगतान्यहस्तं ।
चक्रायुधं नेत्रवतीतटस्थं चिन्तामणिं श्रीनरसिंहमीडे ॥ 30 ॥

उद्धृत्य पातालतलात् करस्थ चक्रेण चक्रं खलयोगिनीनां ।
निहत्य गौरीवरकामदोऽभूत् उन्नम्रकर्णो नरसिंह एषः ॥ 31 ॥

## 10. नेत्रावती नदिय वर्णने

वराहनयनानन्धधारा नेत्रावती सरित् ।
शुष्कां तद्भक्तिलतिकां पुष्णाति कथमन्यथा ॥ 32 ॥

कोलल्लोलकृपाशीलल्लोचनाम्बुजचुम्बिनि ।
मज्जनेत्रावतीतोयो तद्दयेक्षास्पदं न कः ॥ 33 ॥

## 11. नेत्रावती मत्तु कुमारधारा नदिगळ संगम वर्णन्

कुमारधारासरिता समेता नेत्रावती भाति तरङ्गिणीयं ।
त्रिमार्गगातीरगतोऽप्यवात्सीत् त्रिलोचनो यत्र सहस्रमूर्तिः ॥ 34 ॥

## 12. कुमारधारा नदीवर्णन्

कुमारधारे सुजनोद्दारे विज्ञानधारया ।
पुनीहि मामघस्तोमं लुनीहि सद्नीहितं ॥ 35 ॥

कुमारधारे त्वत्तीरे मुक्तिद्वारे गुणाकरे ।
तपस्तपन्तः सन्मन्त्रं जपन्तः स्याम सन्ततम् ॥ 36 ॥

## 13. सुब्रह्मण्यक्षेत्र मत्तु सुब्रह्मण्यदेवर वर्णन्

सुब्रह्मण्यस्य महिमा वर्णितुं केन शक्यते ।
यत्रोच्छिष्टमपि स्पष्टं श्वित्रिणः शोधयत्यहो ॥ 37 ॥

ब्रह्महत्यादोषशेषं ब्राह्मणानां हरन्नयं ।
विरोधे तु परं कार्यं इतिन्यायममानयत् ॥ 38 ॥

सुब्रह्मण्य सुराग्रगण्य कुजनारण्यज्वलत् पावक
प्रब्रूयात् तव विक्रमं भुविः कविः कोवाऽमरो वा दिवि ।
यः प्रागप्रतिमल्लतारकमहादैत्यं सुदृप्तं भवान्

विप्रौघप्रिय सुप्रभाव समरे क्रीडन्नजैषीद्विषम् ॥ 39 ॥

अन्नं ददासि विद्धास्यखिलस्य रक्षां

क्लिन्नं पुनासि विलुनासि समस्तदोषान् ।

हे स्कन्द! वन्द्य! भवतो भुवनो भवानी-

सूनो! कृपाजलनिधे! कतमः समःस्यात् ॥ 40 ॥

प्रवर्तीतस्कान्दमतः पृथिव्यां जगत्पतिं श्रीपतिमात्मनाथं ।

रहस्युपाराधयितुं गुहाद्य गुहाश्रितोऽसीति मम प्रतर्कः ॥ 41 ॥

श्रीविष्णुतीर्थमुनिमित्र! सुरारिजैत्र

श्रीकृष्णपञ्जलजभृङ्ग! कृताघभङ्ग ।

सद्येश देहि सकलैरुपजीव्यमन्नं

संहर्तृ सर्वभुवनस्य कुमार! मह्यं ॥ 42॥

## 14. वेदव्यास संपुट

यत्र सम्पुटमस्फोटं कृष्णस्य स्फोरयत्यहो ।

आग्राह्यत्वमदृश्यत्वं किं पुनस्तत्र पण्डिताः ॥ 43 ॥

अभेद्यमतियत्नेनाप्यस्खलत् कृष्णविग्रहं ।

तत्पूजाभाजनं भाति माध्वं हृदिव सम्पुटं ॥ 44 ॥

## 15 .पयस्विनी नदि

पयस्विनि जगत् स्वामि त्वयी सन्निहितो ध्रुवं ।
न चेत् तत् प्रेयसी तीरे कथंतेऽवतरिष्यति ॥ 45 ॥

## 16. सुवर्णानदि

वेदाचलह्रदुद्भूतां सुवर्णां को नु वर्णयेत् ।
अंहसो दह्यमानस्य श्रावयन्तीं स्वनं जनान् ॥ 46 ॥

## 17. कुम्भासि क्षेत्र

भासि कुम्भासिसञ्ज त्वं क्षेत्र श्रीशगिरीशयोः ।
यत्र कुम्भासुरस्यासिः अभासीत् द्रौपदीपतिः ॥ 47 ॥

गुहामुखं तीर्थनेत्रं वेदस्थानं वनायनं ।
यत्यर्थ्यं गौतमक्षेत्रं चित्रं तत्तनुवद्बभौ ॥ 48 ॥

## 18. कोटेश्वरक्षेत्र

चारुकोटेश्वरस्थानं शोभते यत्पुरत्रयं ।
पुरारिरिव निर्जित्य ध्वजेनाद्यापि जृम्भते ॥ 49 ॥

नमस्ते शितिकण्ठाय कोटिसङ्घर्षितोषणात् ।
यः कोटेश्वरसञ्ज्ञोऽभूत् स किं नैकर्षिकामधुक् ॥ 50 ॥

## 19. क्रोडशङ्करनारायण क्षेत्र

क्रोडयोगीश्वरक्षेत्रं भाति शुक्तिमतीतटे ।
सतां मता द्विता यत्र स्फष्टोमेशरमेशयोः ॥ 51 ॥

द्वासुपर्णेति वेदार्थभूतौ तौ प्रायशोऽमरौ ।
यदेकोऽश्नाति बहुशोऽनश्नन्नन्योविवर्धते ॥ 52 ॥

श्रुतिशतवर्णितचरितं यतिहृन्निरतं यथेष्टगुणभरितं ।
किङ्करवरदमनिन्द्यं शङ्करनारायणं वन्दे ॥ 53 ॥

शूलसुदर्शनसुरुचं बालेन्दूज्वलकिरीटशोभितशिरसं ।
पङ्कजमुखकरचरणं शङ्करनारायणं वन्दे ॥ 54 ॥

पीनोरुकटिसुनाभिं ध्यानार्होरःस्थिताहिफणहारं ।
शङ्खाभ्रवर्णमनघं शङ्करनारायणं वन्दे ॥ 55 ॥

## 20. कोल्लूरु क्षेत्र

मूकाम्बिका कृपालोकादाकाङ्क्षितफलप्रदा ।
मूकानकृत मे शत्रून् एकान्तिकजनप्रिया ॥ 56 ॥

क्वचित् पृथिव्यां परतश्चरन्ती नभःस्थलं क्वापि मुहुर्व्रजन्ती ।
विपक्षविध्वंसविधौ स्फुरन्ती कात्यायनी कन्दुकवद्विभाति ॥ 57 ॥

## 21. सह्याद्रि

सह्योऽप्यसह्योऽसि गिरे पापानामस्तु तत्तथा ।
अचलस्त्वं चलसि यन्मनसस्तन्न रोचते ॥ 58 ॥

## 22. हरिहर

मुरपुरहर ! लक्ष्मीपार्वतीकेलिलोल !
स्फुरदसितसिताङ्गासह्यचक्रत्रिशूल !
परतर गुरुमूर्ते ! पावनापारकीर्ते !
हरिहर ! तव पादाम्बोजयुग्मं नतोस्मि ॥ 59 ॥

हरे भवहरे तेऽङ्घ्रौ भक्तिर्मुक्तिप्रदास्तु मे ।
वैराग्यभाग्यं वितर हर गौरीमनोहर ॥ 60 ॥

यदेकेन न वध्योऽरिः ततो हरिहरावुभौ ।
सहागतावर्धदृश्यौ ऐक्यंचेत् शत्रुणा जितं ॥ 61 ॥

अर्धनारीश्वरश्शम्भुः यथा भेदेऽपि दृश्यते ।
मूर्तेरेकैकभागस्थौ तथा हरिहराविमौ ॥ 62 ॥

निर्विषं वत्सनाभश्च यथैकामाश्रितौ लताम् ।
तथा हरिहरौ भिन्नतरावप्येकमूर्तिगौ ॥ 63 ॥

## 23. (बिदरहळ्ळि) अश्वत्थनारायण

मा याहि पुष्करमहीमथवा प्रयागं
काशीं गयां बदरिकाश्रममप्यसाध्यम् ।
सेतुं च राघवकृतं वरतुङ्गभद्रा-
तीरस्थपिप्पलगृहं हरिमेहि सिद्ध्यै ॥ 64 ॥

पादस्थानल्पपादः तनुनिहिततनुः कोमलाग्रस्थितास्यः
स्कन्धस्यन्दोऽग्र्यशाखास्थित करनिकरः श्रीधराश्लिष्टपार्श्वः ।
व्याप्याश्वत्थं मुकुन्दस्त्रिदशपरिवृतस्तुङ्गभद्रातिभद्रे
वेणुग्रामे सदास्ते सकलजनमनोऽभीष्टदायी दयाळुः ॥ 65 ॥

मध्यस्थकृष्ण ! परिपालय भक्तवर्गं
रुद्राश्रिताग्र ! रुजमर्दय सेवकस्य ।
पद्मासनावसथ ! मूल सृजास्यतन्तुं
सद्वन्द्यपिप्पलतरो ! वितराखिलेष्टम् ॥ 66॥

तुङ्गातरङ्गपरिनर्तनपूतवातसङ्गेन तेऽङ्घ्रिप दलानि चलन्ति भान्ति ।
जन्मान्तरोत्थदृढमूल दुरन्तदुष्कृत्युन्मूलनोद्यतकराङ्गुलिकान्तिमन्ति ॥ 67 ॥

## 24. बिदरहळ्ळि सोमेश्वर

सोमेश्वराय सितभूतिविकस्वराय प्रेमप्रवृद्धगिरिजाहृदिभास्वराय ।

तुङ्गोल्लसत्पवनपावितवंशपल्लीमाङ्गल्यहेतुचरिताय नमश्शियवाय ॥ 68 ॥

## 25. बंकापुर केशव

शङ्खाम्भोजगदासुदर्शनधरं सङ्कीर्त्यमानं सुरैः
कैङ्कर्यप्रियलक्ष्यणेन्द्ररचितालङ्कारपूजोत्सवं ।
पङ्कोद्भूत  समानलोचनयुगं बङ्कापुरश्रीकरं
हुङ्कारध्वनि धिकृताश्रितजनातङ्कं भजे केशवं ॥ 69 ॥

## 26. वरदानदि

स्मरदाश्रितदुष्कर्म गुरुदाह विदारिणीं ।
वरदां हरिदासेष्टवरदानरतां भजे ॥ 70 ॥

## 27. बनवासि मधुकेश्वर

हरि ! सायकनिर्दग्धपुर गायकधूर्धर ।
सुरनायक दैत्येन्द्र वरदायक  पाहि मां ॥ 71 ॥

## 28. धर्मगङ्गा नदी

हे धर्मगङ्गे ! पापौघभङ्गे तुङ्गतरङ्गिणि ।
चेतो मदीयं सद्धर्मकर्मण्येव स्थिरङ्कुरु ॥ 72 ॥

## 29. शाल्मलीनदी

नदीमुदेऽस्त्वियं प्रत्यङ्ङ् नदीनहृदयङ्गमा ।
गङ्गोत्तुङ्गा दृश्यतेऽद्धा रम्याष्टम्यां यदम्भसि ॥ 73 ॥

भर्तुरग्रे स्वलावण्यविस्तृतेरविवेकिनीं ।
स्वासेवितां सखीमेतां सर्वसेव्यां करोतिसा ॥ 74 ॥

## 30. सोदाक्षेत्र

गङ्गा माध्वयतेः कीर्त्यै स्थानश्रीभूमनोहरं
कृत्वा त्रिविक्रमं चक्रे पितृमात्रग्रजोत्सवम् ॥ 75 ॥

त्रिविक्रमं रम्यगदारिशङ्खसरोजमालाधरमिन्दुवर्णं ।
मनोहराङ्गं यतिवादिराजप्रतिष्ठितं नौमि सदा प्रसन्नं ॥ 76 ॥

## 31. मंजुगुणि वेंकटेश

मनोहरगिरिद्रोणीवासं श्रीशं सतां वशं ।
धनुर्बाणधरं भाग्यकरं पापहरं भजे ॥ 77 ॥

खलमृगमृगयार्थं पादुकाशोभिपादः
करधृतशरचक्रोद्दामशङ्खाग्र्यचापः ।
सकलभुवि चरित्वा मञ्जुगुण्याख्यरम्य-

स्थलसदनगतोऽभूद्वेङ्कटेशो मुकुन्दः ॥ 78 ॥

## 32. एणभैरव

यस्यभैरवनादेन विद्रवन्त्यफराशयः ।
एणा इव भयान्नित्यं तं नतोऽस्म्येणभैरवम् ॥ 79 ॥

## 33. गोकर्ण

ये विष्णोः पदपद्मचिन्तनरताः तत्कर्मनिष्ठाश्चये
ये तद्भक्तपरायणाः शुभधियः येऽर्चन्ति मां चानिशं ।
एकान्ते तदभीष्टमाशु वसुधे देहीति गां बोधयन्
श्रीगोकर्णकृतालयो विजयते देवस्स गौरीधवः ॥ 80 ॥

गोकर्णभासिताङ्गः प्रत्युपकुर्वन्निवाम्बिकारमणः ।
गोकर्णसंज्ञमधुनाभासयति क्षेत्रमम्बुधेस्तीरे ॥ 81 ॥

पूर्णेन्दुवर्ण गोकर्णाकार मारभयङ्कर ।
भवाय भव मे देव भवानीप्रिय शङ्कर ॥ 82 ॥

दुष्टानां विघ्नकर्ता सुचरित सुजनस्तोमविघ्नापहर्ता
तस्माद्विघ्नादिपोऽहं मत इति सुधियां स्पष्टमाज्ञापनाय ।
पौलस्त्येच्छान्तरायःसुरमुनिनिकराभीष्टसम्प्राप्त्युपायः
श्रेयो विघ्नाधिराजः प्रदिशतु सततं भूरि गौरीतनूजः ॥ 83 ॥

## 34. कोल्हापुर

अमानवनजस्थानसरसीकुलसङ्कुले ।
रमा कोल्हापुरक्षेत्रे वसतीति किमद्भुतम् ॥ 84 ॥

ध्याताऽऽध्यातान्तशान्तप्रियजनविभवायान्वहं या हृदन्तः
ख्याताख्याताद्दशाभ्युन्नति वितरणशक्त्यालया या पयोऽब्धेः ।
जाताऽजातादिदेवव्रजमनुजततेः श्रेयसे भूयसे सा
माता मा तापसाराधित पदकमलाधोक्षजप्रेयसी स्यात् ॥ 85 ॥

## 35. तपती (नदिय परिचय)

कथं तापाभिधा तेऽम्ब तापघ्न्या इति संशयः ।
अघतापप्रदायिन्यास्तव सन्दर्शनाद्गतः ॥ 86 ॥

## 36. नर्मदा

स्वावगाहनमात्रेण या स्वर्गवनिताजनैः ।
सह नर्मगिरां दात्री भजे तां नर्मदानदीं ॥ 87 ॥

## 37. प्रभासक्षेत्र

सरस्वतीहिरण्याभ्यां सङ्गो यत्रापराम्बुधेः ।
प्रभासाख्यं तदाभाति प्रभास हि यतो भुवः ॥ 88 ॥

## 38. बाणगङ्गा

बाणप्रयोगसञ्जात बाणगङ्गा विभाति सा ।
स्वच्छा स्मरदघच्छेत्री कृष्णकीर्तिरिवोन्मुखी ॥ 89 ॥

## 39. द्वारका क्षेत्र

विश्वम्भरां घनतरामपि भूरियत्नैः निर्भिद्य यत्पदमुपेत्य बलीन्द्रगेहात् ।
आस्ते त्रिविक्रमतनुर्हरिरद्वितीया सा द्वारकेप्सितपुमर्थकरी पुरी नः ॥90॥

त्रिविक्रमो विजयते त्रयीविख्यातविक्रमः ।
यः कुशं दमयित्वेमां चक्रे विप्रकुशस्थलीं ॥ 91 ॥

सगदोऽपि ह्यसौ देवः संसारेऽगदतामगात् ।
त्रिविक्रमोऽप्यसौ योगिमनसोऽविक्रमोऽभवत् ॥ 92 ॥

## 40. गोमती नदि

श्रीकृष्णचरणाम्भोजरजोरञ्जितगोमतीं ।
गोमतीमब्धिरमणीं भजे तापत्रयापहां ॥ 93 ॥

फुलफेनसिताम्भोधिकल्लोलधृतया तया ।
वल्लभालिङ्गनसुखं दुर्लभं लभ्यतेऽनिशं ॥ 94 ॥

## 41. चक्रतीर्थ

चक्रतीर्थस्यमहिमा वर्णितुं केन शक्यते ।
यच्छिलामपि सङ्गेन विधत्ते विश्ववन्दितां ॥ 95 ॥

## 42 शङ्खोद्धारतीर्थ

पापेनापि समावृतस्य विमलज्ञानोज्झितस्याप्यलं
मग्नस्यापि भवाम्बुधाविह भवेत् पूतस्यजात्योद्धृतिः ।
इत्याख्यापयितुं दरं मुरहरो यत्रोद्दधाराधरात्
शङ्खोद्धारपदं विभाति तदिदं क्षेत्रं पवित्रं भुवि ॥ 96 ॥

## 43. गोपी चंदन महिमा

फाले यल्लिखितं धुनोति विविधां रेखां विधात्रा कृतां
यल्लीलातिलकीकृतं वितनुते विद्वल्ललामायितान् ॥
ऊर्ध्वं यद्धृतमुच्चलोकपदवीसोपानमन्वेति तद्
गोपीचन्दनमञ्जसा विजयते तापत्रयध्वंसनं ॥ 97 ॥

## 44. सिद्धपुरी मत्तु बिन्दुसरोवर

भाति सिद्धपुरि यत्र सिद्धा मुक्तिपुरी नृणां ।
पुण्यं बिन्दुसरो यत्र बिन्दुमात्रं सरस्समं ॥ 98 ॥

## 45. पुष्करक्षेत्र

तीर्थानामुत्तमं तीर्थं पुष्करं मर्त्यदुष्करं ।

विहरन्नपि वाराशौ वराहो यत्सरोऽविशत् ॥ 99 ॥

पश्चिम प्रबन्धम् सम्पूर्णम्

## उत्तर प्रबन्ध

### श्री कृष्णानदी

नमामि सुकृतश्रेणीं कृष्णवेणीं तरङ्गिणीं ।
यद्वीक्षणं कोटिजन्मकृतदुष्कर्मशिक्षणं ॥ 01 ॥

गुरुं कन्यागतं धन्या या पुरस्कृत्य सेव्यसे ।
श्रीकृष्णवेणी पापानि सा त्वं पुण्ययसि ध्रुवं ॥ 02 ॥

किं वर्णयामि हे कृष्णे ! त्वयी कृष्णस्य सन्निधिं ।
यत् समस्तपदोक्तौतु पुम्भावमवलम्भसे ॥ 03॥

श्रीकृष्णवेणि कल्याणि याचे त्वामहमन्वहं ।
श्रीकृष्णचरणाम्भोजे भक्तिं भक्तिभवच्छिदि ॥ 04 ॥

### 2.पंढरापुर

श्री भीमरथ्यमलनीरसमीरवेग-
निर्धूततीरगनराशुभघर्मजालं ।
श्रीपाण्डुरङ्गलसितं वरपुण्डरीक-

क्षेत्रं पवित्रमहमन्वहमाश्रितोऽस्मि ॥ 05॥

तीरे सत् सरितस्तिरस्कृतधनासक्तिर्विरक्तिप्रियः
पादाम्भोजमिदं मदङ्कसहितः सञ्चिन्तयान्तर्हृदि ।
पश्चात्ते कटिमात्र एव भविता संसारवार्द्धिर्न चेत् ।
शिक्षामीति हि लक्षयत्यनुदिनं स्वावस्थया विठ्ठलः ॥ 06 ॥

पापावलीपाटनपद्मपाङ्गः श्रीपाणिपद्माञ्चितजानुजङ्घः
गोपालबालः कृपया स्वयं नःश्रीपाण्डुरङ्गो भवतु प्रसन्नः ॥ 07 ॥

पापापनोदनपटु प्रियभृत्यभृङ्गैः पेपीयमानशुभसुन्दरतारसार्द्रं ।
तापत्रयोपशमनं तरुणार्कवर्णगोपालबालचरणाम्बुरुहं श्रितोऽस्मि ॥ 08 ॥

## 2. गोदावरीनदि

विप्रर्षिदेवकुलसङ्कुलतीरयुग्मा
विद्रावितोघतृणरेणुकणा स्ववातैः ।
स्वादूदकप्रशमिताखिललोकशोका
गोदावरी शुभकरी सरिदुद्धरेन्नः ॥ 09॥

अंहांसि हंसि सततं किल रासि पुण्यं
सिंहस्थिते सुरुगुरौ न तदम्ब याचे ।
गोदे समस्तफलदे दिश कृष्णपादे

भक्तिं विरक्तिमितरत्र परत्र मुक्तिं ॥ 10॥

अदौ धवळगङ्गा या गङ्गाद्वाराभिधान्तरे ।
पश्चात् कुशावर्तपदा गोदा मोदाय सा सदा ॥ 11 ॥

## 4. यमुना नदि

काळिन्दी ! त्वमघान्वितानपि सतःकृत्वापवित्रात्मनो
गन्तुं नैव कदापि मुञ्चसि तव भ्रातुर्निकेतंप्रति ।
किन्तु क्षीरपयोधिवासनिरतान् प्रीत्या करोष्याश्रितान्
स्निग्धे भर्तरि कामिनीजनरुचिस्तत्पक्ष एव ह्यलं ॥ 12 ॥

## 5. त्रिवेणी प्रयाग क्षेत्र

त्रिवेणियमघश्रेणीकृपाणी मुक्तिकारिणी ।
ममानीहितमादह्याद्धिमानीमंशुमानिव ॥ 13 ॥

प्रयागमाधवो भूयाद्दयावारिनिधिर्हृदि ।
प्रकृष्टयागसदृशी सकृद्यस्य हि संस्मृतिः ॥ 14 ॥

## 7. गंगा

त्वं दीनेषु दयावतीति विदितं यद्ब्रह्महस्ताश्रयं
प्राप्ताथाच्युतपादसङ्गमहितापश्चाच्चनाकं गता ।

सौवर्णाचलश्रृङ्गमेत्यमुदिता शम्भो शिरः सङ्गता-

प्यास्माकक्षितिमण्डले त्रिपथगे तुष्टास्यभीष्टप्रदा ॥ 15 ॥

आदौपादतलोर्ध्वभागमहसा या रक्तनीला हरेः

स्वर्गस्त्रीकुचकुङ्कुमाङ्कनयनोपान्तश्रियाभ्यन्तरे ।

अन्ते शम्भुकपर्दपन्नगगलश्रेणीज्वलज्ज्योतिषा

जन्मारभ्यसरस्वितीनतलयासङ्गेव गङ्गास्ति सा ॥ 16 ॥

अज्ञानाद्यदि सज्जनेषु रचितद्रोहान्मयि स्वर्धुनि

स्वस्फूर्त्या सुजनेषु दूषणगणारोपादवज्ञातव ।

तर्हि त्वां सगरात्मजास्थिनिकराः जानन्ति किं तैःप्रभोः

द्रोहः किं न कृतः किमम्ब न हरावारोपिताचोरता ॥ 17 ॥

आरभ्याब्जजलोकमाक्षितितलादायातया किं त्वया

मच्चित्तं बहुदूरमित्यबलयात्यक्तं भिया जाह्नवी ।

अक्षय्याचलतुङ्गश्रृङ्गनिकरान्निर्भिद्य यान्ती मम

स्वल्पं किं बहुमान्यसेऽशुभकुलं गङ्गेऽन्तरङ्गे चलं ॥ 18 ॥

अस्तिस्पर्शनमात्रतः किमु तव श्रेयःप्रदत्वं गतं

विस्तीर्णा न किमच्युतस्यनगरी मन्मात्रदेशोज्जिता ।

तद्वत्मापि सकण्टकं किमु सतां सन्तानजोऽहं न किं

कस्मादम्ब न मे प्रदास्यसि पदं गङ्गेऽखिलार्थप्रदं ॥ 19 ॥

हे गङ्गे तव कोमलाङ्घ्रिनलिनं, रम्बोरु नीवीलसत्-

काञ्चीदामतनूदरं फनकुचव्याकीर्णहारंवपुः ।

सन्मुद्राङ्गदकङ्कणावृतकरं स्मेरं स्फुरत्कुण्डलं

सारङ्गाक्षि जलान्यदिन्दुरुचि ये जानन्ति तेऽन्येजलात् ॥ 20॥

श्रीनारायण राम गोपति हृषीकेशादिरूपोऽक्षम-

स्त्वां हातुं हरिसूकराकृतिरथ श्रीदेवहूत्यात्मजः ।

वेणीमाधवबिन्दुमाधवतनुस्तीरे व्यदत्त स्थितिं

गङ्गे किं बहुनाधुनापि वसति त्वद्भर्तृ गेहेह्यसौ ॥ 21 ॥

गङ्गे त्वं शुभसञ्चयस्य जयदा दोषात्मनां नत्विति

ज्ञातं यत्क्रतुकोटिलभ्यसुकृतस्याभ्युन्नतिं यच्छसि ।

दुष्कर्माण्यमितानि दूरयसि यत् त्वद्धेयतोयेक्षया

पानानाप्यवगाहनेन मनसा ध्यानेन गानेन वा ॥ 22 ॥

## 8. काशीक्षेत्र

रूप्याचले कृतपदोऽपि गिरीन्द्रपुत्री-

प्रेमप्रवाहभरमानितमानसोऽपि ।

काशीमसीवरणयोः पुरमन्तराले

प्रेतावृतामपि सतीपतिरध्यतिष्ठत् ॥ 23 ॥

## 9.बिंदुमाधव

स बिन्दुमाधवः पायाद्विभोर्यस्य निरीक्षणात् ।
अपारोऽपि हि संसारसिन्धुर्बिन्धुत्वमश्नुते ॥ 24 ॥

## 10. श्री विश्वनाथ

दोषं मे हर हे हरेति पतितं पादे नखच्छद्मना
निर्दोषं मृगबिम्बमेणहरणात् कृत्वैवमूर्ध्निन्यधात् ।
गङ्गातीरनिवासतः शुचितमं कुर्वन्निवाहीश्वरासङ्गात्
तत्प्रथयन्निव प्रतिदिनं पायात् स मृत्युञ्जयः ॥ 25 ॥

मौलौ यच्चरणाम्बुफालफलके यस्याङ्घ्रिरेणुःकथा
कर्णे वाचि यदीयनाम हृदि यद्रूपं यदास्वादितं।
कुक्षौ यत्तपसेऽपटं कटितटिं व्याघ्राजिनेसंस्थितिः
पादौयत्पुरचारिणौ स हि सदा तत्किङ्करः शङ्करः ॥ 26 ॥

## 9. गयागदाधर

गयाभिधमिदं क्षेत्रं श्रये श्रेयस्करं नृणां ।
स यत्र सहते जातु क्रिया जन्मान्तरक्रियां ॥ 27 ॥

गदाधर ! सदारधस्फुरितचारुहासोल्लसत्

सुधाधर मुदाधरामरकृतस्तुते सुन्दर ।
पदाधरमदाधरऽस्खलितमीश मां सद्धर-
प्रदाधरचिदादर प्रमुदितान्तर श्रीधर ! ॥ 28 ॥

यद्यात्रा पितृमण्डलस्य तनुते वैकुण्ठयात्रां परां
यत्र क्षिप्ततिलाः महान्ति तिलशः कुर्वन्ति पापान्यहो ।
पिण्डो यत्र समर्पितो यमभटान् पिण्डीकरोत्यक्षता
मर्त्यं स्माक्षतमीड्यताम् स्तुतिततिस्तं विष्णुपादं भजे ॥ 29 ॥

## 10. फल्गुनदी

अपि जन्मशतोद्भूतं कृपया या हरन्त्यघं ।
मनुते फल्गु सा फल्गुनदी सद्गुणदाऽस्तु मे ॥ 30 ॥

## 11. मथुरा

सेना यत्र विरक्तवैष्णवजना नामायुधं श्रीपतेः
कामाद्यैस्सहितः कलिः किल रिपुर्यत्रान्वहं हन्यते ।
प्राकारादि च यत्र तीर्थनिकरः कर्मापि वर्म प्रभो
दद्यात् स मधुरापुरी शुभकरी श्रेयांसि भूयांसि नः ॥ 31 ॥

## 12. विश्रांति तीर्थ

संसार संसरणखेदविबेधकारि कंसारि संश्रिततटीगतचारुवारि ।
विश्रान्तितीर्थममलं हरिलोकवासविश्रान्तिदं दिशतु नस्सकलेप्सितानि ॥ 32 ॥

मखकोटिसहस्राणां मुखं म्लानयतो मुहुः ।
अघश्रान्तिकरस्यास्य कथं विश्रान्तितीर्थता ॥ 33 ॥

## 13. वृंदावन

यत्कुञ्जाः मुरवैरिसङ्गतवधूविक्रीडनैर्वासिताः
यत्सञ्जातसुरद्रुमौघमहसा विद्योतिताशामुखं ।
यत्पाथः सुरसिन्धुसिन्धुमहितं यत्राखिलैर्लक्षितं
श्रुत्यन्तान्तरितं महःपरमहो वृन्दावनं पावनं ॥ 34 ॥

## 14. अयोध्या

अयोध्या रामदयिता भाति साध्वी वधूरिव ।
वनङ्गतस्यापि तस्य पादुके याऽकरोत्पतिं ॥ 35 ॥

## 15. नैमिषारण्य

मुनीन्द्रमानसावालरूढकृष्णकथालता
विभाति नैमिषारण्यमही सर्वमहीयसी ॥ 36 ॥

## 16. हस्तिनापुरी

अन्तर्निविष्टकलिकौरवसैनिकापि

या धर्ममेव दयितं वरायाम्बभूव ।

योगीन्द्रबुद्धिरिव भीमपराक्रमेण

सा भाति हस्तिनपुरी प्रथिता त्रिलोक्यां ॥ 37॥

## 17. कुरुक्षेत्र

श्रीभीमसेनकरकञ्जगदाप्रहारैः

चूर्णीकृताश्वगजपत्ति मृदुग्रपिण्डं ।

उत्खातपार्थशरसस्यपदं कुरूणां

क्षेत्रं दिशासु विततान सुकीर्तिधान्यम् ॥ 38 ॥

## 18. शंबल

कलेर्भीरुजना यात शम्बलं जगतां बलं ।

कलिशौर्यहरः कल्की यत्र प्रादुर्भविष्यति ॥ 39 ॥

## 19. षट् प्रयागः

षट् प्रयागाः स्ववेगेन कामाद्यरिमहीरुहः ।

उन्मूलयन्तु पापाख्यं पङ्कं प्रक्षालयन्तु नः ॥ 40 ॥

## 20. बदरीक्षेत्र

अमरी भ्रमरीपुञ्जसमरीचिभिरञ्चिता ।

बदरी वद् रे किं किं अधरी कुरुते न सा ॥ 41 ॥

धर्माद्योऽजनि धर्म एव स रतिं दध्यात् स्वयोगश्रियं
यागाभ्यासरतः स्मरादिविजयं कन्दर्पदर्पापहः ।
उत्तुङ्गाद्रिगतः सदोच्चपदवीं योषित्कदम्बेषु नः
पुत्रीवन्मतिमुर्वशीजनयिता नारायणः सद्गुणान् ॥ 42 ॥

हस्तद्वन्द्वगचक्रशङ्खरुचिरं वृत्तोरुमध्यस्फुरत्
रक्तोत्तानकरारविन्दयुगलं पद्मासनस्थं प्रभुं ।
विष्वङ्ङ् नारदमुख्ययोगिनिकरैः संसेव्यमानं सुधा
वीक्षाक्षालित भक्तिकिल्बिषविषं नारायणं चिन्तये ॥ 43 ॥

यत्रक्षेत्रे विधेः सत्रे हयग्रीवो ह्यवातरत् ।
धाराद्वारात्रयी तत्र श्रूयतेऽद्यापि सूरिभिः ॥ 44 ॥

धातर्देवसमूह मन्दर महि प्रह्लाद शक्रद्विज-
व्रात ख्यात समुद्र पार्थ शिव सद्धर्मानृतं मा वद ।
अश्वग्रीवममुं विहाय कतमं देवं नमामः स्तुमः
सत्कुर्मः किमु कर्मशर्मदमित्योऽन्यद्ब्रह्मकिंवास्ति नः ॥ 45 ॥

श्लोकेनैकेन लोकेशश्लोकाल्लेशोऽनुवर्णितः ।
तच्च सच्चरित्रश्चित्ते प्रत्यर्प्य प्रीयतां मम ॥ 46 ॥

श्रीबदर्याश्रमं पुण्यं यत्र यत्र स्थितिःस्मरेत् ।
स याति वैष्णवं स्थानं पुनरावर्तिवर्जितः ॥

॥ उत्तर प्रबन्धम् सम्पूर्णम् ॥

## पूर्व प्रबन्धः

### 1.गङ्गासागरसङ्गम

अब्धे ! स्निग्धोसि सरसेष्वाद्योऽस्यब्जसखोऽप्यसि ।
मुखैरनैकैर्यो गङ्गामुखान्याचुम्ब्य जृम्भसे ॥ 01 ॥

### 2.पुरीजगन्नाथ

जगन्नाथो विजयते जगतामर्चितस्सदा ।
ज्ञानाख्यरम्यपरशोः यं दारु जगुरागमाः ॥ 02 ॥

### 3. श्रीशैल

श्रीशैलशिखरावासो भातीशो मल्लिकार्जुनः ।
बद्धस्वीयजटाजूटमध्यस्थ इव चन्द्रमाः ॥ 03 ॥

## 4. अहोबल

अहोबलनृसिंहस्य महोबलमुपाश्रिताः ।
असत्तमिस्रसंमिश्रां गणयामो न संसृति ॥ 04 ॥

यःस्तम्भे प्रकटीबभूव स मयि स्तम्भायितेऽपि स्फुटी
भूयाद्यो भवनाशिनीतटगतः छिन्द्यात्स मेऽमुं भवं ।
योऽपाद्बालकमप्यसौ नरहरिः मां बालिशं पातु यो
रक्षोऽशिक्षदसौ प्रभुः खिलकुलं शिक्षत्वरूक्षप्रियः ॥ 05 ॥

विरुद्धधर्मधर्मित्वं सर्वान्तर्यामितां तथा ।
नरसिंहोऽद्भुतस्तम्भसम्भूतः स्पष्टयत्ययं ॥ 06 ॥

विदारितपूदरप्रकटितान्त्रमालाधरं
तदात्मजमुदावहप्रियतरोग्रलीलाकरं ।
उदाररवपूरिताम्बुजभवाण्डभाण्डान्तरम्
सदा नरहरिं श्रये नखरनव्यवज्राङ्कुरं ॥ 07 ॥

उद्यन्मध्वमतायुधेन परितः संसारसंज्ञे वने

माध्वन्मायिमतङ्गमर्दनविधौ सोऽहं सहायस्त्विति ।

हर्यक्षस्य सदृक्षतां वहति यस्तस्य द्वितीयोऽप्यहं

साजात्येन सदेति मानवतुलां पायान्नृसिंहः स नः ॥ 08 ॥

## 5. भवनाशिनी नदि

नृसिंहविलसत्पादकुशेशयकृतोत्सवे ।

भवनाशिनि मच्चीर्णपापानां भवनाशिनी ॥ 09 ॥

## 6. निवृत्तिसङ्गम वर्णन्

निवृत्तिसङ्गमो भाति यत्र मर्त्यमुपाश्रिताः ।

निवर्तन्तेऽखिलादोषाः संयुनक्ति शुभावलीः ॥ 10 ॥

## 7. तुङ्गभद्रा नदि

नतोऽस्मि तुङ्गां विलसत्तरङ्गां अघौघभङ्गां हरिपादसङ्गां ।

श्रितोऽस्मि भद्रां हृतपापनिद्रां विमुक्तिपद्यां विमलैकसाध्यां ॥ 11 ॥

तटनीषु तुङ्गभद्रे स्वादूदक सङ्कुला त्वमसि नूनं ।

कस्मात्तीर्थपदोऽसौ धत्ते त्वामेव दंष्ट्रयोः नो चेत् ॥ 12 ॥

## 8.हंपेय विठ्ठल

चौर्यान्मातृनिबद्धचारुचरणः पापौघचौर्याद्बुधैः
बद्धस्त्वं पथि पुण्डरीकमुनिना जारेति सम्बोधितः ।
तुङ्गातीरगतोऽसि विठ्ठल ! दिशन्नन्याकृतिर्वाञ्छितम्
वेतृणां यदि मे न दास्यसि पदं त्वत्सं स्थितिः कथ्यते ॥ 13 ॥

## 9. विरूपाक्ष

पम्पाध्यक्षो विरूपाक्षः सम्पदे स्यात् सतां सदा ।
यो हेमगिरिसीमायां राजते राजशेखरः ॥ 14 ॥

## 10. हंपे

पम्पा सम्पत्करी सेयं किं पापां न हरेन्नृणां ।
याऽधोमुखीकरोत्येतन्नामोच्चारण मात्रतः ॥ 15 ॥

## 11. हंपादेवि

मालाभिः समलङ्कृताऽतिविमला लोलोल्लसल्लोचना
शूलेन त्रिदलेन दैत्यकलने कालायितेन द्विषः ।
फाले पादतलं निधाय बलिनं योन्मूलयन्तीखलं
बाला मे बलदास्तु लोलवलया श्रीबालहम्पालया ॥ 16 ॥

## 12. आनेगोंदि

राजधानि जयती सा गजगह्वरसंज्ञिता ।

यत्र भ्रान्ति गजा मध्वराद्धान्त धरणीधराः ॥ 17 ॥

## 13. श्री जयतीर्थरु

माध्वग्रन्थान् स्वबन्धूनिव सरसहृदालिङ्ग्य विज्ञातभावः
संयोज्यालङ्कृताभिः स्वसहजमतिसम्भूत वाग्भिर्वधूभिः ।
कृत्वान्योक्तिश्च दासीः बुधहृदयगृहं प्रौढवृत्तीश्च वृत्तीः ।
दत्वाऽन्योन्याभियोगं जयमुनिरसकृत् वीक्ष्य रेमे कृतार्थः ॥ 18 ॥

## 14. तिरुपति (वेङ्कटाचलक्षेत्र)

श्रीवेङ्कटलसच्छैलवासी दासीकृतामरः ।
छायया पातुमां नित्यं श्रीनिवास सुरद्रुमः ॥ 15 ॥

दृष्ट्वा दिशि दिशि स्वीयान् दयया पालयन्निव ।
वर्तते विश्वतश्चक्षुः वेङ्कटे वेङ्कटेश्वरः ॥ 20 ॥

ये शङ्खचक्रोज्वल बाहुयुग्माः स्वाङ्घ्रिं भजन्ते भवसिन्धुरेषां ।
कटिप्रमाणस्त्विति वेङ्कटेशः स्फुटीकरोत्यात्मकराम्बुजातैः ॥ 21 ॥

प्रायोन्यत्र गतां श्रियं निजवशां कर्तुं मुहुः काङ्क्षितं
भक्तानां प्रदिशन् धनं प्रतिदिनं संसाध्य साध्यप्रियः ।
तत्तत्रैव पुनः सहस्रगुणितं पश्यन् घनश्यामलः
तेषां वेश्मसु विस्मितो निवसति श्रीवेङ्कटेशोऽनिशं ॥ 22 ॥

आरूढगरुडस्कन्दं आलिङ्गितरमाधरं ।
आनमज्जनसर्वस्वं आश्रये वेङ्कटेश्वरं ॥ 23 ॥

कशिपूकृत्य यं शेते गिरीकृत्याधितिष्ठति ।
अवतीर्णोऽनुजीवकृत्य स तद्भक्ताग्रणिःफणी ॥ 24 ॥

शङ्कररविशशिमुख्याः किङ्करपदवीमुपाश्रिता यस्य ।
वेङ्कटगिरिनाथोऽसौ पङ्कजनयनः परात्परो जयति ॥ 25 ॥

श्रीवेङ्कटगिरिद्रोणी क्षोणी यस्यानणीयसी ।
तं वरेण्यं सुराग्रण्यं वेदगम्यं भजामहे ॥ 26 ॥

श्रीवेङ्कटपते दीनगते रम्याकृते क्षितौ ।
समस्समस्तमर्त्यार्तिप्रमर्दन किमस्तिते ॥ 27 ॥

समस्तसुजनाधारं दोषदूरं गुणाकरं ।
श्रीवेङ्कटचलावासं श्रीनिवासं भजेऽनिशं ॥ 28 ॥

आनन्दतीर्थवरदे दानवारण्यपावके ।
ज्ञानदायिनिसर्वेशे श्रीनिवासेऽस्तु मे मनः ॥ 29 ॥

## 15.सुवर्णमुखी नदी

सुवर्णमुखि ! संसेवे सुवर्णाभं पयस्तव ।

सुवर्णशोभिवदनं कुरु मामम्ब निर्मलं ॥ 30 ॥

## 16. कांचीवरदराज

रम्यो वरदराजोऽयं रसिकाग्रेसरो ध्रुवं ।

कथमात्मवधूश्लाघ्य काश्चीदेशे न चेद्वसेत् ॥ 31 ॥

याचे वरदराज त्वां काश्चीशेह न किश्चन ।

चेतनाचेतनजगद्वरं त्वामेव देहि मे ॥ 32 ॥

द्विजेष्टदातृत्वमजार्चितत्त्वं अजन्मतां स्वां मखभोक्तृतां च ।

व्यनक्त्ययं श्रीपतिरग्रहार परीतधातृक्रतुवेदिजातः ॥ 33 ॥

## 17. शिवकांची –एकाम्रेश्वर

कन्तुरम्यशराक्रान्तस्वान्तं मत्वेव पार्वती ।

आम्रमूले स्थितं शम्बुमालिङ्ग्यास्ते शुचिस्मिता ॥ 34 ॥

## 18. कंचि कामाक्षी

प्रपद्ये तव कामाक्षि चरणौ शरणं सदा ।

यत् सौन्दर्याम्बुदिं द्रष्टुं त्रिनेत्रोऽभून्महेश्वरः ॥ 35 ॥

उत्पादयंस्त्वयि सुतौ गिरिजे गिरीशः सौन्दर्यभङ्गजभियेव भवो भवत्याः ।

कामाक्षि विघ्नहरमेकमसावकार्षीत् षाण्मातुरं त्वपरमङ्गजभङ्गकोऽपि ॥ 36 ॥

## 19. अरुणाचलेश्वर (तिरुवण्णामलै)

फणिगणवरभूषः पार्वतीश्लाघ्यवेषः खलजनकृतरोषः खण्डितात्मीयदोषः ।
सदरुणगिरिवासः शक्रसूर्याद्यधीशः परिहृतभवपाशः पातु मां पार्वतीशः ॥37॥

## 20. तिरुक्कोयिलूरु

त्रिविक्रम न विक्रमं गणयितुं फणी शक्नुते ।
तवेश नतवेपथुप्रशमनं परे किं पुनः ।
अजाण्ड घनबाण्डखण्डनपटीयसी यन्मृदु-
प्रदीप्तनिगमोक्तपन्नखशिखा जगद्व्यापिनी ॥ 38 ॥

## 21. वृद्धाचलेश्वर

वृद्धाचलकृतावासस्सद्योजातस्त्रिलोचनः ।
अद्यैव ज्ञाननयनं वर्धयत्वचलं मयि ॥ 39 ॥

हराय भजकानिष्टहराय पुरवैरिणे ।
भवाय भवते भूयाच्छिवाय शिरसा नमः ॥ 40 ॥

## 22. श्रीमुष्ण भूवराह

वराह वरदंष्ट्रय कुटिलया कठोरं रिपुं
विदीर्य सुरधुर्य गां निजपदारविन्दानुगां ।

उपेत्य सुखचित्तनुः सरसलीलयालिङ्ग्य तां
सिताङ्ग जगताङ्गते विहरसीह पुण्यस्थले ॥ 41 ॥

## 23. कुंभघोण

कुम्भघोणे वस श्रीश शार्ङ्गमाच्छादय प्रभो ।
तथाप्यतुललावण्यैर्जनास्त्वां जानतेऽच्युतं ॥ 43 ॥

हृतभूभारदैत्येय कृतविश्वजनावन ।
शार्ङ्गपाणे शराणां ते लक्ष्यं पापानि मेऽधुना ॥ 43 ॥

॥ पूर्वप्रबन्धम् सम्पूर्णम् ॥

## दक्षिणप्रबन्ध

## श्रीरंगक्षेत्र-श्रीरंगनाथ

कावेरीहृदये वसन् कमलभूतातः कृपावीक्षणैः
जीवांहः शमयन् श्रीया च धरया सेव्योऽतिभव्यो विभुः ।
देवैरावरणस्थितैः कृतनतिश्शेषाङ्गशायी सदा
भावे मे विधुपुष्करिण्यधिपतिः श्रीरङ्गनाथोऽस्त्वयं ॥ 01 ॥

श्रुतिशतपरिगीतः शुद्धभावैर्गृहीतः
कमलनिलयतातः कञ्जनेत्रः प्रतीतः ।

सकलजगदतीतः सर्वसम्पत्समेतः
प्रविशतु मम चेतः प्रत्यहं रङ्गनाथः ॥ 02 ॥

श्रीरङ्गनाथः सुरसिद्धगीतः कारुण्यसिन्धुः कविवर्गबन्धुः ।
स्मेरास्यचन्द्रः स्मरतां महेन्द्रक्ष्मारुट् प्रसन्नः क्षपयत्वघं नः ॥ 03 ॥

लये शयानोऽप्युदरस्थलोक भरेण लक्ष्मीकरविभ्रमैश्च ।
अनिद्रितोऽद्याङ्घ्रिनिषेवणे तां नियुज्य निद्रासि किमम्बुजाक्ष ॥ 04 ॥

निजाङ्घ्रिसेवानिरतान् मनुष्यान् विधूतनिद्रान् विदभासि यस्त्वं ।
तवेश तस्यामलबोधमूर्तेः सहामहे सम्प्रति नैव निद्रां ॥ 05 ॥

नवाम्भोदनीलः स्फुरद्धेमजालः स्मरच्चित्तलोलः सुरश्रेणिपालः ।
श्रीये रङ्गधामास्त्वयं पुण्यनामा महैश्वर्यसीमा गुणस्तोमभूमा ॥ 6 ॥

## 2. पंचफणशेष

सहस्रवदनः शेषः पञ्चवेदान् पठंस्तव ।
पञ्चास्योऽभूद्विजिह्वश्च त्वां क्षेत्रेण समं स्तुवन् ॥ 07 ॥

यथा शयानः सततं रङ्गक्षेत्रे व्यरूरुचः ।
तथा हरे मेऽन्तरङ्गे रङ्गनाथ विरोचय ॥ 08 ॥

## 3. चंद्रपुष्करिणि

हित्वा हरजटागङ्गां यत्रेन्दुरतपत्तपः ।

चन्द्रपुष्करिणी सेयं मन्दभाग्यैर्न सेव्यते ॥ 09 ॥

## 4. कावेरी नदी

कावेरी कमनीयाङ्गं रङ्गनाथं सदा हृदि।

धत्से त्वत्सेवया देवि कोनु कुर्यान्न तं हृदि ॥ 10 ॥

मोक्षदानक्षमास्सन्ति सरितस्तत्र तत्र हि ।

कावेरी चोलभूमाता भुक्तिमुक्तिकरी सरित् ॥ 11 ॥

## 5. वृषभाचल

यस्यान्तकोऽपि शिरसा दास्यं धत्ते तपस्तपन् ।

सस्याद्वृषभशैलेन्दुरस्माकं श्रेयसे हरिः ॥ 12 ॥

## 6. नूपुरगङ्गा

हरिनूपुरजातेऽलं कुरु गङ्गे मनो मम ।

परिहृत्य घनीभूत दुरितस्तोमकर्दमं ॥ 13 ॥

## 7. दर्भशयन

यत्प्राग् जघान तृणमप्यस्त्रीभूयापराधिनं ।

दयालुरब्धौ तेनाभूत् दर्भशायीह राघवः ॥ 14 ॥

## 8. रामसेतु

सीतामात्मसुतां खलैरपहृतामानेष्यतः स्वां पुरीं
जामातुर्हितकारिणीवधरणीवाध्य्म्बुवृद्धाकृतिः ।
भूभारक्षपणोद्यतस्य सचवीभूता महीध्रा इव
श्रीरामस्य भटैःकृतो विजयते सेतुर्विजेतुर्द्विषां ॥ 15 ॥

प्रगीतजानकीनाथप्रतापस्वर्णवैभवे ।
प्रत्ययार्थमयं सेतुः निकषाश्मायते नृणाम् ॥ 16 ॥

न मूर्छति शिलोच्चये पवनवेग इत्यज्ञवाग्
यतोहनुमताहृतास्सुबहवो मरुत्सूनुना ।
गभीरतरवारिधि स्थगनचुञ्चवः पर्वताः
जयन्ति कृतसेतवः क्षपणहेतवो रक्षसां ॥ 17 ॥

पारावाराख्यरम्योपनिषदि विलसत्सेतवे सूत्रमात्रे
रामव्यासेन सेनानुगतिफलकृते दर्शिते रामभृत्यः।
नानास्थानोपनीतैर्हनुमदभिनवश्रीमदानन्दतीर्थैः
तेनेऽमानाद्रिमानैस्तमिममतिदृढं रम्यमात्मीय गम्यम् ॥ 18 ॥

रामाङ्घ्रिरेणुप्रेम्णेव सेतोरुभयतोऽम्बुधिः ।
अभ्येति पौनःपुन्येन वर्धमानः पदे पदे ॥ 19 ॥

सीतालक्ष्मणशोभिपार्श्वयुगलः प्रीत्यावनम्राकृतिं
वक्राम्भोरुहसक्तहस्तकमलं भक्तं भटाग्रेसरं ।
एकान्ते हनुमन्तमुक्तिसुधया सन्तर्पयन् सन्ततं
रामस्तम्भितवारिधिर्विजयते धानुष्कचूडामणिः ॥ 20 ॥

## 9. रामेश्वर

कामद्विषं कामितदानदक्षं श्रीमज्जटाजूटविभासिगङ्गं ।
रामेश्वरं रामकृतप्रतिष्ठं रामागृहीतार्धतनुं नतोऽस्मि ॥ 21 ॥

कल्पान्ते सुरभूसुरासुरमुनिस्तोमं हरन् कंहरं
पृथ्व्यां पातककोटिपाटनपटूरामः समाराधयत् ।
यत्पादाब्जरजोऽहरन्मुनिवधूपापं श्रुता यत्कथा
मुक्तिं दोग्धि परेशितुः परमियं लीलाखलध्वंसिनः ॥ 22 ॥

यं ध्यायन् तारकब्रह्ममन्त्रं जपति धूर्जटिः ।
अफोत्ताराय काकुत्स्थः पूजयामास तं किल ॥ 23 ॥

ब्रह्महत्यानिमित्तेन कपाल्यास्तेऽधुनामप्रियः ।
अंहस्तदेव संहर्तुं स रामस्यार्चितःकिल ॥ 24 ॥

यद्रावणवधे हेतुः सेतुर्जेतुं क्षमस्तमः ।
तदघं तद्रिपोरासीत् असङ्गस्य किलाद्भुतं ॥ 25 ॥

## 10 धनुष्कोटि

यद्द्वारतस्थबहुतीर्थनिषेवणेन
लभ्यं फलं दिशति तन्ममसेतुखण्डः ।
इत्थंधियेव परिवर्तितचापकोट्या
चिच्छेद सेतुमधिकं रघुपुङ्गवोऽत्र ॥ 26 ॥

जना नानादानाध्ययनयजनापूर्तविधिना
वृथा खिन्ना दैन्यं भजथ निजनिःश्रेयसकृते ।
सुरश्रेणीक्षोणीसकल सुजनाभीष्टफलदा
धनुष्कोटी पेटी सुकृतसुधनस्यास्तिमहती ॥ 27 ॥

## 11. श्रीरामपादस्तोत्र

पातिव्रत्यपरिक्षयाख्यललनादोषाङ्कुरच्छेदनं
पाषाणीकृतगौतमार्यवनिताविज्ञानदानक्षमं ।
साम्राज्योचितभोग्यभोगविरसं श्रीरामतेऽङ्घ्रिं श्रये
नैर्मल्याय निरन्तरस्मृतिकृते वैराग्यभाग्याय च ॥ 28 ॥

## 12. श्रीराम स्तोत्र

कपिकटकधुरीणः कार्मुकन्यस्तबाणः
क्षपितदितिजसैन्यः क्षत्रियेष्वग्रगण्यः ।

जलधिरचितसेतुर्जानकीतोषहेतुः
पथि पथि गुणसान्द्रः पातु मां रामचन्द्रः ॥ 29 ॥

## 13. ताम्रपर्णी नदि

ताम्रपर्णिसरित्तोयं सेवनीयं मुमुक्षुभिः
मुक्तीकरोति यत्रत्या शुक्तिश्च पतितं जलं ॥ 30 ॥

## 14. महेंद्र पर्वत

तरणिरिव हनूमान् प्राप लङ्कां दिदृक्षुः
धरणि तव तनूजां नैव भेतव्यमम्ब ।
इति गदितुमिवान्तःप्रापितो भाति भूमेः
पवनसुतजवेनामन्दमाहेन्द्रशैलः ॥ 31 ॥

## 15. कन्याकुमारि

या सूते सेवमानानां भाग्यरोग्यापुनर्भवान् ।
कन्याकिलेयं तीर्थं च कन्यातीर्थमिदं किल ॥ 32 ॥

सहधर्मं विदधतीमिव बाणान्तकारिणीं ।
वार्धौ स्निग्धामिमां रम्यां कन्यां मन्यामहे रमां ॥ 33 ॥

असि मन्मथमाता त्वं कन्ये मान्यतमे सतां ।
न चेत् सौन्दर्यमाश्चर्यं कथमेतत्तनौ तव ॥ 34 ॥

## 16. अगस्त्यवर्णनं

अगस्त्यो मुनिशार्दूलो भवाब्धेर्नसमुद्धरेत् ।
चुलुकीकृतगम्भीरजृम्भिताम्भोधिडम्बरः ॥ 35 ॥

## 17. शुचींद्रक्षेत्र

इन्द्रशौचविधानात्ते न शुचीन्द्रातिपौरुषं ।
अनिन्द्रस्य मनश्शौचं मम कृत्वा तदार्जय ॥ 36 ॥

## 18. आदिकेशवक्षेत्र

शेषे शयान शरदिन्दुसमानवक्त्र
श्रीशादिकेशव सितोदकजातनेत्र ।
दोषातिदूर गतपार गुणाम्बुराशे
दासे दयां कुरु मयीश गतेतराशे ॥ 37 ॥

## 19. घृतमालानदी

रूक्षपापाटवीदाहदक्षज्ञानानलोन्नतेः ।
सततं हेतुभूतेयं घृतमाला विराजते ॥ 38 ॥

## 21. अनंतशयनक्षेत्र

श्रीभूम्यां कृतपादसेवनमनर्घ्योरुस्फुरद्भूषणं
शेषाङ्के सततं शयानमुदरप्रोद्भासिपद्मं प्रभुं ।
धात्रा स्तोत्रचयैः स्तुतं फणिफणैश्छत्रोपमैर्मण्डितं
सेवेऽनन्तपुरेश्वरं मुनिवरप्रेमाकरं श्रीकरं ॥ 39 ॥

किंलोकात्मकपद्मकम्पनभियापुत्रप्रियेणाथवा
नागाग्रेसरभोगसौभगकृतस्नेहेन वाहर्निशं
किं वा श्रीश निजार्पितोरुविविधस्वाद्वोदनास्वादना-
च्छेषेऽनन्तपुरेश शेषवपुषि श्रीसेवयावाग्र्यया ॥ 40 ॥

त्रीणि त्रयी परिजगाद यदात्मदृष्टि द्वाराणि चारुतरशीलनरोचितानि ।
प्रत्यक्षमेतदनुभावयति प्रमेयं प्रौढप्रजाः प्रभुरनन्तपुरेऽब्जनाभः ॥ 41 ॥

या तैत्तिरीयनिगमान्तगकिंवदन्ती सेवात्रयोचितफलत्रितयं वदन्ती ।
तत्रत्यसंशयमपाकुरुतेऽङ्घ्रिमध्यवक्त्रं क्रमेण घटयन् दृशि पद्मनाभः ॥ 42 ॥

पास्यनन्त पुरेश त्वं अशेषं शेषशाय्यपि ।
तथा हि करुणावन्तः परकार्यदुरन्धराः ॥ 43 ॥

यथा गुहामुखे नाथ शेषे शेषे रमापते ।
तथा हार्दगुहामध्यं अध्यासीनो रमस्व मे ॥ 44 ॥

सुरगणपरिवारः शोभमनोरुहारः करिकरसमहस्तः काञ्चनोद्दीप्तवस्त्रः ।
शुभजनकृतगानः शेषभोगे शयानः प्रभुरयमविनाशः प्रीयतामिन्दिरेशः॥ 45 ॥

## 21. उपसंहार

नानावृत्तं स्वयात्राक्रमपरिचितसुक्षेत्रमाहात्म्ययुक्तं
शब्दालङ्कारबद्धं शमलकुलहरश्लाघनीयार्थहृद्यं ।
श्रीनाथप्रीतिहेतोः हयवदनकृपाम्भोदिसम्भूतरत्नं
चक्रे तीर्थप्रबन्धं बहुगुणभरितं वादिरोजो यतीन्द्रः ॥ 46 ॥

## 22. फलश्रुति

पद्यानि प्रथितापगाच्युतयशो हृद्यानि तत्खण्डिता-
वद्येनामलवादिराजयतिना मध्वोक्ति शुद्धात्मना ।
बद्धान्यध्वरसिद्धसत्कृतिचयोद्रिक्तोरुपुण्यप्रदा-
न्यद्धा ! यःपठते श्रुणोति स भेवेदुद्धामधामश्रियः ॥ 47 ॥

## दक्षिण प्रबन्धं संपूर्ण

**इति श्रीमत्कविकुलतिलक वादिराजपूज्यचरणविरचित तीर्थ प्रबन्धं संपूर्ण श्री कृष्णार्पणमस्तु**

॥ श्री वादिराज गुरुभ्यो नमः ॥

# ॥ ध्यान स्नानम् ॥

**श्री सनत्कुमार उवाच**

खस्थितं पुण्डरीकाक्षं मन्त्रमूर्तिं हरिं स्मरेत् ।
अनन्तादित्यसङ्काशं वासुदेवं चतुर्भुजम् ॥ 01 ॥

शङ्खचक्रगदापद्मपीताम्बरधरं हरिम् ।
श्यामलं शान्तहृदयं प्रसन्नवदनं हरिम् ॥ 02 ॥

अनेकरत्नसञ्छिन्नस्फुरन्मकरकुण्डलम्।
वनमालापरिवृतम् नारदादिभिरर्चितम् ॥ 03॥

सुवर्णकङ्कणैर्दीप्तं किङ्किणीभिः सुशोभितम् ।
केयूरहारिणं देवं सुवर्णमुकुटोज्वलम् ॥ 04 ॥

द्वजवज्राङ्कुशालक्ष्म्यपादपद्मं सुनिर्मलम् ।
तत्पादोदकजां धारां निपतन्तीम् स्वमूर्धनि ॥ 05 ॥

चिन्तयेद्ब्रह्मरन्द्रेण प्रविशन्तीं स्वकां तनुम् ।
तया प्रक्षालयेत्सर्वमन्तर्देहगतं मलम् ॥ 06 ॥

तत्क्षणाद्विरजामन्त्री जायते स्फाटिकोपमः ।
इदं ध्यानपरं मन्त्रात्सहस्रगुणमुत्तमम् ॥ 07 ॥

सार्धत्रिकोटितीर्थेषु स्नातात्कोटिगुणाधिकम् ।
यो नित्यामाचरेदेवं सवै नारायणः स्मृतः ॥ 08 ॥

कालमृत्युमतिक्रम्य जीवन्मुक्तो न संशयः ।
इला भागीरती गङ्गा पिङ्गला यमुना स्मृता ॥ 09 ॥

तयोर्मध्ये गता नाडी सुषुम्नाख्या सरस्वती ।
ज्ञानह्रदे ध्यानजले रागद्वेषमलापहे ॥ 10 ॥

यःस्नातिमानसे तीर्थे स याति परमाङ्गतिं ॥

अपवित्रः पवित्रोवा सर्वावस्थां गतोऽपिवा ।
यः स्मरेत् पुण्डरीकाक्षं सबाह्याभ्यन्तर शुचिः ॥ 11 ॥

अति नीलफनश्यामं नळिनायतलोचनम् ।
स्मरामि पुण्डरीकाक्षं तेन स्नातो भवाम्यहम् ॥ 12 ॥